धी, ओ ङ य आराधे। नादरे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) अनादर इति कातन्त्रादौ। ओ, धीनः। ङ य, धीयते खलं लोकः। इति दुर्गादासः॥

धीः, स्त्री, (ध्यै चिन्तने + भावे क्विप्। सम्प्रसारणञ्च।) बुद्धिः। इत्यमरः। १।५।१॥ (यथा, मनौ। ६।९२।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्॥")

धीतः, त्रि, पीतः। इति धेधातोः क्तप्रत्ययेन निष्पन्नः॥

धीतिः, स्त्री, (धेट पाने + क्तिन्।) पिपासा। इति हेमचन्द्रः। ३।५८॥

धीदा, स्त्री, (धियं ददातीति। दा+कः। स्त्रियां टाप्।) कन्या। मनीषा। इति हेमचन्द्रः॥

धीन्द्रियं, क्ली, (धीजनकमिन्द्रियम्।) ज्ञानेन्द्रियम्। तद्यथा। मनः १ नेत्रम् २ श्रोत्रम् ३ त्वक् ४ रसना ५ घ्राणम् ६। इत्यमरः। १।५।८॥

धीमान्, [त्] पुं, (धीरस्यास्तीति। धी+मतुप्।) वृहस्पतिः। पण्डिते, त्रि। इति मेदिनी। ते, ११५॥ (यथा, मनुः। १।१०२।
"तस्य कर्म्मविवेकार्थं शेषाणामनुपूर्व्वशः। स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत्॥"
नरपुत्त्रस्य विराजः पुत्त्रः। यथा,—
"नरो गयस्य तनयः तत्पुत्त्रोऽभूत् विराट् ततः। तस्य पुत्त्रो महावीर्य्यो धीमांस्तस्मादजायत॥"
इति विष्णुपुराणे। २।३६।
पुरूरवसः उर्व्वशीगर्भजातः पुत्त्रविशेषः। यथा, महाभारते। १।७५।२४।
"षट्सुता जज्ञिरेऽथैलादायुर्धीमानमावसुः। दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः॥")

धीमती, स्त्री, (धीमत्+स्त्रियां ङीप्।) बुद्धिमती। इत्यमरः। २।६।१२॥

धीरं, क्ली, (धियं रातीति। रा+कः।) कुङ्कुमम्। इति मेदिनी। रे,५१॥ (पर्य्यायोऽस्य यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम्। सङ्कोचं पिशुनन्धीरं वाह्लीकं शोणिताभिधम्॥")

धीरः, पुं, (धियं राति ददाति रक्षतीति वा। रा+कः।) ऋषभौषधिः। इति राजनिर्घण्टः॥ वलिराजः। इति शब्दरत्नावली॥

धीरः, त्रि, (धियं ईरयतीति। ईर+अण्। यद्वा, धियं रातीति। रा+कः।) धैर्य्यान्वितः। स्वैरः। पण्डितः। इति मेदिनी। रे, ५१॥ (यथा, भागवते। ३।६।४५।
"तथापरे चात्मसमाधियोग-
बलेन जित्वा प्रकृतिं बलिष्ठाम्।
त्वामेव धीराः पुरुषं विशन्ति
तेषां श्रमः स्यान्न तु सेवया ते॥"
बलयुतः। इति शब्दरत्नावली॥ मन्दः। इति त्रिकाण्डशेषः॥ (यथा,—
"देहि समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन॥"
इति रसमञ्जर्य्याम्।)
विनीतः। इति संक्षिप्तसारोणादिवृत्तिः॥ (गम्भीरः। यथा, रघुः। ३।४४।
"अवोचदेनं गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव॥")

धीरत्वं, क्ली, (धीरस्य भावः। धीर+त्व।) धीरता। यथा,—
"प्रागल्भ्यौदार्य्यमाधुर्य्यशोभाधीरत्वकान्तयः। दीप्तिश्चायत्नजा भावहावहेलाः स्त्रियोऽङ्गजाः॥"
इति हेमचन्द्रः। ३।१७३॥

धीरपत्री, स्त्री, (धीरं मनोहरं पत्त्रमस्याः। स्त्रियां ङीष्।) धरणीकन्दः। इति राजनिर्घण्टः॥

धीरस्कन्धः, पुं, (धीरः अचञ्चलः भारसह इति यावत् स्कन्धो यस्य।) महिषः। इति हेमचन्द्रः। ४।३४८॥

धीरा, स्त्री, (धीर+टाप्।) काकोली। महाज्योतिष्मती। इति राजनिर्घण्टः॥ (गुडूची। अस्याः पर्य्याया यथा,—
"गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी। छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥ जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली। चक्रलक्षणिका धीरा विशल्या च रसायनी॥ चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मानावस्थायां मध्याप्रगल्भानायिकाभेदः। अस्या लक्षणम्। व्यङ्ग्यकोपप्रकाशा धीरा। मध्याया धीरायाः कोपव्यञ्जिका गीः। प्रौढाधीरायास्तु रतावौदास्यम्। सा द्विविधा। ज्येष्ठा कनिष्ठा च। मध्या धीरा यथा,—
"लीलालिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधाराः।
देहि समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन॥
प्रौढा धीरा यथा,—
"नो तल्पं भजसे न जल्पसि सुधाधाराशुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात्।
इत्थं केतकगर्भगौरि! दयिते कोपस्य संगोपनं
किं स्यादेव न चेत् पुनः सहचरी कुर्व्वीत साचिस्मितम्॥"
इति रसमञ्जरी॥

धीराधीरा, स्त्री, (धीरा अधीरा च।) मानावस्थायां मध्याप्रगल्भा नायिकाभेदः। अस्या लक्षणम्। व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा। मध्याया धीराधीरायाः कोपव्यञ्जिके वचनरुदिते। प्रौढाधीराधीराया रतावौदास्यं तर्ज्जनताडनादि च कोपस्य प्रकाशकम्। सा द्विविधा। ज्येष्ठा कनिष्ठा च। मध्याधीराधीरा यथा,—
"कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि।
इत्थं निगद्य सुदृशा वदने प्रियस्य
निःश्वस्य वाष्पलुलिता निहिता दृगन्ताः॥"
प्रौढाधीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काक्वाकुलवाचिसाचिहसितस्फुर्जत्कपोलश्रिया।
हस्तन्यस्तकरे पुनर्म्मृगदृशा लाक्षारसक्षालितप्रौढी प्रेङ्खमयूखमांसलरुचो विस्फारिता दृष्टयः॥"
इति रसमञ्जरी॥

धीलटिः, स्त्री, (धिया बुद्ध्या लटति बालोक्त्या मोहयतीति। लट्+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) दुहिता। इति हारावली॥ २१६॥

धीवा, [न्] पुं स्त्री, (ध्यायतीति। ध्यै+"ध्याप्योः संप्रसारणञ्च।" उणां। ४।११५। इति क्वनिप्। संप्रसारणञ्च।) धीवरः। यथा, बहुधीवरी बहुधीवा। इति मुग्धबोधम्॥

धीवरः, पुं, (दधाति मत्स्यानिति। धा+"छित्वरच्छत्वरधीवरपीवरेति।" उणां। ३।१। इति ष्वरच् प्रत्ययेन निपातनात् साधुः।) कैवर्त्तः। इत्यमरः। १।१०।१५॥ (यथा, महाभारते। २।२०।१७।
"यतो हि निम्नं भवति नयन्ति हि ततो जलम्। यतश्छिद्रं ततश्चापि नयन्ते धीवरा जलम्॥")

धीवरी, स्त्री, (धीवर+ङीप्।) धीवरपत्नी। कैवर्त्ती। इति मुग्धबोधम्॥ मत्स्यवेधिनी। इत्युणादिकोषः॥

धीशक्तिः, स्त्री, (धियः शक्तिः।) बुद्धिसामर्थ्यम्। तत्पर्य्यायः। निष्क्रमः २। इत्यमरः। ३।२।२५॥ सा चाष्टधा। यथा,—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा। ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥"
इति भरतः॥

धीसखः, पुं, (धियः सखा सहायः। "राजाहःसखिभ्यष्टच्।" इति टच्।) मन्त्री। इति हेमचन्द्रः। ३।३८३॥

धीसचिवः, पुं, (धियि बुद्धौ मन्त्रणादौ सचिवः सहायः।) मन्त्री। इत्यमरः। २।८।४॥

धु, ञ न कम्पे। इति कविकल्पद्रुमः॥ (स्वां-उभं-सकं-अनिट्।) ञ न, धुनोति धुनुते। कम्प इह चालनस्य रूपम्। धुनोति चम्पकवनानि धुनोत्यशोकं वायुरिति हलायुधः। इति दुर्गादासः॥

धुः, स्त्री, (धवनमिति। धु कम्पने+भावे डुः।) कम्पनम्। इत्येकाक्षरकोषः॥

धुक्ष, ङ सन्दीपने। क्लेशे। जीवे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) पञ्चमस्वरी। ङ, धुक्षते वह्निः सन्दीप्यते इत्यर्थः। धुक्षते जनः क्लिश्यति जीवति वेत्यर्थः। इति दुर्गादासः॥